✧｡･ﾟ*❋ ❋*ﾟ･｡✧

# श्री चण्डी-ध्वज स्तोत्रम्
# (Shri Chandi Dhwaj Stotram)

✧｡･ﾟ*❋ ❋*ﾟ･｡✧

# श्री चण्डी-ध्वज स्तोत्रम्

**॥ विनियोग ॥**

अस्य श्री चण्डी-ध्वज स्तोत्र मन्त्रस्य मार्कण्डेय ऋषिः, अनुष्टुप् छन्दः,
श्रीमहालक्ष्मीर्देवता, श्रां बीजं, श्रीं शक्तिः, श्रूं कीलकं मम वाञ्छितार्थ फल
सिद्धयर्थे विनियोगः.

**॥ अंगन्यास ॥**

श्रां, श्रीं, श्रूं, श्रैं, श्रौं, श्रः ।

**॥ मूल पाठ ॥**

ॐ श्रीं नमो जगत्प्रतिष्ठायै देव्यै भूत्यै नमो नमः ।
परमानन्दरुपिण्यै नित्यायै सततं नमः॥१॥

नमस्तेऽस्तु महादेवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा॥२॥

रक्ष मां शरण्ये देवि धन-धान्य-प्रदायिनि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा॥३॥

नमस्तेऽस्तु महाकाली पर-ब्रह्म-स्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा॥४॥

नमस्तेऽस्तु महालक्ष्मी परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा॥५॥

नमस्तेऽस्तु महासरस्वती परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा॥६॥

नमस्तेऽस्तु ब्राह्मी परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥७॥

नमस्तेऽस्तु माहेश्वरी देवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥८॥

नमस्तेऽस्तु च कौमारी परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥९॥

नमस्ते वैष्णवी देवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१०॥

नमस्तेऽस्तु च वाराही परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥११॥

नारसिंही नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१२॥

नमो नमस्ते इन्द्राणी परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१३॥

नमो नमस्ते चामुण्डे परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१४॥

नमो नमस्ते नन्दायै परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१५॥

रक्तदन्ते नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१६॥

नमस्तेऽस्तु महादुर्गे परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१७॥

शाकम्भरी नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१८॥

शिवदूति नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥१९॥

नमस्ते भ्रामरी देवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२०॥

नमो नवग्रहरुपे परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२१॥

नवकूट महादेवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२२॥

स्वर्णपूर्णे नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२३॥

श्रीसुन्दरी नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२४॥

नमो भगवती देवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२५॥

दिव्ययोगिनी नमस्ते परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२६॥

नमस्तेऽस्तु महादेवि परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२७॥

नमो नमस्ते सावित्री परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२८॥

जयलक्ष्मी नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥२९॥

मोक्षलक्ष्मी नमस्तेऽस्तु परब्रह्मस्वरुपिणि ।
राज्यं देहि धनं देहि साम्राज्यं देहि मे सदा ॥३०॥

चण्डीध्वजमिदं स्तोत्रं सर्वकामफलप्रदम् ।
राजते सर्वजन्तूनां वशीकरण साधनम् ॥३१॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते॥

≪ · ◦ ❈ ◦ · ≫

# Shri Chandi Dhwaj Stotram

**॥ Viniyoga ॥**

Asya śrī caṇḍī-dhvaja stotra mantrasya mārkaṇḍeya ṛṣiḥ, anuṣṭup chandaḥ, śrīmahālakṣmīrdevatā, śrāṃ bījaṃ, śrīṃ śaktiḥ, śrūṃ kīlakaṃ mama vāñchitārtha phala siddhayarthe viniyogaḥ.

**॥ Aṅganyāsa ॥**

Śrāṃ, śrīṃ, śrūṃ, śraiṃ, śrauṃ, śraḥ ।

**॥ Mūla Pāṭha ॥**

Oṃ śrīṃ namo jagatpratiṣṭhāyai devyai bhūttyai namo namaḥ ।
Paramānandarūpiṇyai nityāyai satataṃ namaḥ ॥1॥

Namaste'stu mahādevi parabrahmasvarūpiṇi ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥2॥

Rakṣa māṃ śaraṇye devi dhana-dhānya-pradāyini ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥3॥

Namaste'stu mahākālī para-brahma-svarūpiṇi ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥4॥

Namaste'stu mahālakṣmī parabrahmasvarūpiṇi ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥5॥

Namaste'stu mahāsarasvatī parabrahmasvarūpiṇi ।

Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||6 ||

Namaste'stu brāhmī parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||7 ||

Namaste'stu māheśvarī devi parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||8 ||

Namaste'stu ca kaumārī parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||9 ||

Namaste vaiṣṇavī devi parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||10 ||

Namaste'stu ca vārāhī parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||11 ||

Nārasimhī namaste'stu parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||12 ||

Namo namaste indrāṇī parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||13 ||

Namo namaste cāmuṇḍe parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||14 ||

Namo namaste nandāyai parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||15 ||

Rakta-dante namaste'stu parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||16 ||

Namaste'stu mahādurge parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||17||

Śākambharī namaste'stu parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||18||

Śivadūti namaste'stu parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||19||

Namaste bhrāmarī devi parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||20||

Namo navagraharūpe parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||21||

Navakūṭa mahādevi parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||22||

Svarṇapūrṇe namaste'stu parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||23||

Śrīsundarī namaste'stu parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||24||

Namo bhagavatī devi parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||25||

Divyayoginī namaste parabrahmasvarūpiṇi |
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ||26||

Namaste'stu mahādevi parabrahmasvarūpiṇi |

Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥27॥

Namo namaste sāvitrī parabrahmasvarūpiṇi ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥28॥

Jayalakṣmī namaste'stu parabrahmasvarūpiṇi ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥29॥

Mokṣhalakṣmī namaste'stu parabrahmasvarūpiṇi ।
Rājyaṃ dehi dhanaṃ dehi sāmrājyaṃ dehi me sadā ॥30॥

Caṇḍīdhvajamidaṃ stotraṃ sarvakāmaphalapradam ।
Rājate sarvajantūnāṃ vaśīkaraṇa sādhanam ॥31॥

Sarvamaṅgalamāṅgalye śive sarvārthasādhike ।
Śaraṇye tryambake gauri nārāyaṇi namo'stute ॥

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧